योजयामासुर्निःशेषेण जनाधिप !” भा० अनु० ५०अ० । २गवाक्षे ३समूहे च ३अस्फुटफलादौ ४क्षारके (जालि) । ५दम्भे मेदि० गवाक्षो गवाक्षच्छद्रं तत्र “गवाक्षजालै रभिनिष्पतन्त्यः” भट्टिः समूहे “नीहारजालमलिनः पुनरस्तचान्द्राः” “करजालमस्ततमसोऽपि सताम्” माघः “गवाक्षसौधजालपतितां रविभासः” किरा० ६इन्द्रजाले हेम०।७कदम्बवृक्षे पु० मेदिनिः ।

**जालक** पु० जालमिव कायति कै–क । १गवाक्षे हेमच० । स्वार्थे क ।२जालशब्दार्थे । “मक्षिकाः मशकान् केशान् जालकानिव पश्यति” सुश्रु० ३क्षारके पुंस्त्री स्त्रियां ङीप् शब्दार्थचि० । ४जालतुल्ये मेघलोम्नि च ।

**जालकारक** पु० कृ–ण्वुल् ६त० । जालस्य मर्क्षकादिग्राहणाय जालाकारस्य कारके-मर्कटे (माकड़सा) हेमच० शाखेन कृत्रिमस्य २कर्त्तरि त्रि० । शाखेन कृतपदार्थस्य स्वरूपाच्छादकत्वेन जालतुल्यकरणात्तस्य तथ त्वम् ।

**जालकि** पु० त्रिगर्त्तषष्ठान्तर्गते आयुधजीविभेदे । “आह-स्त्रिगर्त्तषष्ठास्तु कौण्डोपरथदाण्डिकिः क्रौष्टुकिजालमानिश्च ब्रह्मगुप्तोऽथ जालकिः” । सि०कौ० ततः स्वार्थे छ । जालकीय तदर्थे । बहुषु लुक् । जालकय इत्येव ।

**जालकिनी** जालमिव कायति कै–क जालकं देहलोम-तदस्त्यस्याः इनि ङीप् । १मेष्यां त्रिका० २मेघे पु० ।

**जालकीट** पु० जाले पतितः कीटोऽस्य । मर्कटे लूतायां (माकड़सा) तदीयजाले मशकादीनां पतनात्तस्य तथा-त्वम् । जालकीटे भवः पचाद्या० अण् । २तद्भवे त्रि० ।

**जालचौर्य्य** न० जाले जालके चोरं तत्र साधु यत् । चोर-विषे वृक्षभेदे । स्थावरविषोपक्रमे “कुमुदघ्नी स्नुही जालचौर्य्याणि त्रीणि चोरविषाणि” सुश्रुतः ।

**जालगर्द्दभ** पु०क्षुद्ररोगभेदे । क्षुद्ररोगशब्दे२२८२पृ०दृश्यम् ।

**जालगोणिका** जालमिव गोणी यत्र कप् ह्रस्वः । दधिम-न्थनभाण्डे त्रिका० ।

**जालन्धर** पु० दैत्यभेदे “पुरा जालन्धरं दैत्यं ममापि परि-कम्पनम् । पादाङ्गुष्ठस्य रेखातश्चक्रं कृत्वा हरोऽहरत् । तच्च चक्रं मया लब्धं नेत्रपद्मार्च्चनात् विभोः । सुदर्शनाख्यं तैचक्रं दैत्यचक्रविमर्द्दनम्” काशी० २१अ० ध्रुवं प्रति विष्णोरुक्तिः । २त्रिगर्त्तदेशे पु० तद्देशस्य तेन कृतत्वात् तथात्वम् । सोऽभिजनोऽस्य अण् । पित्रादिपर-म्परया ३तद्देशवासिनि । बहुषु तस्य लुक् ।४ऋषिभेदे पु० ततः नडा० गोत्रापत्ये फक् । जालन्धरायण तद्गोत्रा-पत्ये पुंस्त्री० । जालन्धरायणस्य विषयो देशः राजन्या० वुञ् । जालन्धरायणक तस्य परिशीलिते देशे पु० ।

**जालपाद्** पु० जालमिव पादोऽस्य हस्त्यादि० नान्त्यलोपः । १हंसे । “जालपादभुजौ तौ तु पादयोश्चक्रलक्षणौ” (नरनारायणौ) भा० शा० ३१४५ अ० । “प्रतुदान् जालपादांश्च कोयष्टिनखविष्किरान्” मनुः “जाल-पादान् खञ्जरीटानज्ञातांश्च मृगद्विजान्” याज्ञ० तन्मा-सभक्षणं निषिद्धवान् । स्त्रियां कुम्भपद्या० अन्त्यलोपे ङीप् पादः पच्च । जालपदी हंसाम् वरणादिगणे जाल-पदीत्यत्र जालपदीति पाठान्तरे जालपद्या अदूरभवो देशः वरणा० अण् । जालपद तस्या अदूरभवदेशे त्रि० । पृषो-अन्त्य लोपः । जालपाद् हंसे त्रिका० ।

**जालप्राया** स्त्री जालस्य प्रायो बाहुल्यं यस्याम् । लौह-मयाङ्गरक्षिण्यां (साजोया) हेमच० ।

**जालमाल** पु० आयुधजीविभेदे । ततः स्वार्थे छ । तदर्थे जालकिशब्दे दृश्यम् ।

**जालवर्वुरक** पु० जालाकारो वर्वुरकः । (काँटाबावला) वृक्षभेदे । “जालवर्वुरको रूक्षो वातरोगकफापहः । पित्तदहकरश्चोष्णः कषायश्च प्रकीर्त्तितः” राजनि० ।

**जालसरस** न० नित्यक० अच् समा० । सरोवरभेदे ।

**जालहृद** त्रि० जलप्रचुरो ह्रदः तत्र भवः तस्येदं वा शिवा० अण् ।१जलप्रचुरह्रदभवे २तत्सम्बन्धिनि च स्त्रियां ङीप् ।

**जालाक्ष** पुं०जालमिवाक्षि यत्र अच् समा० । गवाक्षे “हेमजाला-क्षनिर्गच्छद्धूमेनागुरुगन्धिना” भाग० ८।१५।१६ ।

**जालाष** न० भेषजभेदे ‘जालाषेणाभिषिञ्चत जालाषेणोपसि-ञ्चत । जालाषमुग्रं भेषजं तेन नो मृड जीवसे” अथ० ६।५७।२ ।

**जालिक** पु० जालेन चरति पर्प्या० ष्ठन् । जालेन जीवति वेतना० ठञ् वा । १जालजीविनि जालेन २चारिणि वा ३कैवर्ते त्रिका० ४मर्कटे हेमच० । ५जालजीविनि वागुरिके मृगबन्धनार्थं जालपातिनि मृगयुभेदे अमरः। षित्त्वात् स्त्रियां ङीष् इति भेदः । जालमस्त्यस्य ठन् । ६जालोपजीविनि ग्रामजालिनि च त्रि० हेमच० ।

**जालिका** स्त्री जाल+अस्त्यर्थे ठन् । १वस्त्रभेदे स्त्रीणां मुखावरणवस्त्रे २गरिसारे ३जलौकायां ४विधवायां लोहजालमयरचिताङ्गरक्षण्यां (साजोया) च मेदि० । (जालि) ५क्षारके शब्दार्थ० ।

**जालिनी** स्त्री जाल+अस्त्यर्थे इनि ।१चित्रशालायां हेमच०